# P. R. THAKUR GOVT. COLLEGE

B.A. (Honours) Part-I; Paper-I
B.A. (General) Part-I; Paper-I
CBSE SEMESTER – III
CC-6 (SANACOR06T)
NEP SEMESTER-I
Major DS1(SANDSC101T)
Minor MB1(SANMIN101T)

**TARAK MAJUMDER**

## छन्दोमञ्जरी – गङ्गादासः

1. **छन्दस्य लक्षणम् किम् ?**

साधारणतो हि छन्दशब्दः आह्लादनार्थं प्रतिपादयति। ऐतरेयारण्यके शब्दोऽयं आच्छादनार्थकं प्रकाशते। समासतः चन्दयति छन्दयति आह्लादयति इति पाणिनीमतम्।

2. **किं पद्यस्य लक्षणम् ?**

पद्यं चतुष्पदी आचार्य-गङ्गादासेन तदीये छन्दोमञ्जरी-ग्रन्थे पद्यलक्षण-निरूपण-प्रसङ्गेनोक्तं पद्यम् इति। चतुर्णां पदानां समाहार इति चतुष्पदी। चतुश्चरणात्मकस्य पद्यम् इति नामधेयम्।

3. **पद्यं कतिविधम् ?**

तच्च पद्यं पुनरेव वृत्तं जातिरिति द्विधा। वृत्तं जातिरिति एवं प्रकारेण पद्यं द्विप्रकारं प्रसिद्धम्। वृत्तमक्षरसंख्यातम् अक्षरैः परिगणितं यत् तत् वृत्तं भवति। जातिर्मात्राकृता भवेत् – मात्रा अक्षरावयवारूपाः ताभिः निबद्धाः जातिर्नाम भवेत्।

4. **का नाम यतिः ?**

यतिर्लक्षणनिर्देश-प्रसङ्गे छन्दोमञ्जर्याम् आचार्यैः गङ्गादासैः अभिहितम् –

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरूच्यते।

सा विच्छेदविरामद्यैः पदैर्वाच्या निजेच्छाया।।

यत्र श्लोके जिह्वा स्वेच्छया उच्चारणात् विरामति तत्र यतिरिति पण्डितैः उच्यते। सा च यतिः उच्चारयितुः निजेच्छया वाच्या। विच्छेद-विराम-विरतिप्रभृतयः शब्दाः यतिपर्याया ज्ञातव्या।

**5. को यतेर्व्यवहारः ?**

अपि च आचार्यैर्पुनरभिहितम् –

क्वचिच्छन्दसोस्ते यतिरभिहितं पूर्वसुरिभिः।

पदान्ते सा शोभां व्रजति पदमध्ये त्यजति।।

पूर्वसुरिभिः अभिहिता यत् छन्दसि सर्वत्र यतिः न वर्तते। यदि सा यतिः पदान्ते वर्तते तर्हि सा शोभां लभते। अपि तु यदि सा पदमध्ये वर्त्तते तर्हि शोभां त्यजति। पुनरपि सुरिभिः कथितं स्वरविहित-सन्धिर्यत्र तत्र पदमध्ये स्थितापि सा यतिः शोभां लभते।

| | **छन्दनाम** | **प्रतिपादे अक्षराणि** | **लक्षणम्** | **गनाः** | **यतिः** |
|---|---|---|---|---|---|
| 1 | इन्द्रवज्रा | 11 | स्यादिन्द्रवज्रा यदि तौ जगौ गः | त-त-ज-ग-ग | पादान्ते |
| 2 | उपेन्द्रवज्रा | 11 | उपेन्द्रवज्रा प्रथमे लघो सा | ज-त-ज-ग-ग | पादान्ते |
| 3 | उपजाति | 11 | अनन्तरोदीरितलक्ष्मभजौ<br>पादौ यदीया वुपजातयस्ताः | ज-त-ज-ग-ग<br>त-त-ज-ग-ग | पादान्ते |
| 4 | द्रुतविवम्बितम् | 12 | द्रुतविवम्बितमाह नभौ भरौ | न-भ-भ-र | पादान्ते |
| 5 | वसन्ततिलकम् | 14 | ज्ञेयं वसन्ततिलकं तभजाजगौ गः | त-भ-ज-ग-ग | पादान्ते |
| 6 | मालिनी | 15 | ननमयययूतेयं मालिनी भोगीलोकैः | न-न-म-य-य | 8+7 |
| 7 | मन्दाक्रान्ता | 17 | मन्दाक्रन्ताम्बुधिर सनगैर्मो भनौ तौ गयुग्मम् | म-भ-न-त-त-ग-ग | 4+6+7 |
| 8 | शिखरिणी | 17 | रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी | य-म-न-स-भ-ल-ग | 6+11 |
| 9 | शार्दूलविक्रडीतम् | 19 | सूर्य्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम् | म-स-ज-स-त-त-ग | 12+7 |
| 10 | स्रग्धरा | 21 | म्रभ्नैर्याणां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् | न-र-भ-न-य-य-य | 7+7+7 |

**इन्द्रवज्रा-वृत्तम् -**

आचार्यगङ्गादासेन विरचितः छन्दोमञ्जरीग्रन्थः। ग्रन्थस्य द्वितीये स्तवके समवृत्तवर्णनावसरे इन्द्रवज्रा-वृत्तस्य लक्षण-निरुपण-प्रसङ्गेन एवमुक्तम् – **'स्यादिन्द्रवज्रा यदि तौ जगौ गः'।** यस्य समवृत्तस्य चतुर्षु एव चरणेषु क्रमान्वये आदौ त-गणद्वयं ततो ज-गणः ततः एको गुरुः ततोऽपि एकः गुरुः वर्तते तत्र इन्द्रवज्रा नाम इति वृत्तं स्यात् । इन्द्रवज्रा एकादशाक्षरा वृत्तिः। अस्य वृत्तस्य चरणान्ते यतिः भवति। तत्रोदाहरणं नाम –

अर्थो हि कन्या परकीय एव (पादान्तः गः)
तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ।।